# haridrAgaNeshakavacham

# હરિદ્રાગણેશકવચમ્

## Document Information

Text title : haridrAgaNeshakavacham

File name : haridrAgaNeshakavach.itx

Category : kavacha, ganesha

Location : doc_ganesha

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : vishvasAratantre

Latest update : September 14, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 14, 2020

*sanskritdocuments.org*

# હરિદ્રાગણેશકવચમ્

શ્રીગણેશાય નમઃ ।
ઈશ્વર ઉવાચ ।
શ ृणु વક્ષ્યામિ કવચં સર્વસિદ્ધિકરં પ્રિયે ।
પઠિત્વા પાઠયિત્વા ચ મુચ્યતે સર્વસઙ્કટાત્ ॥ ૧॥

અજ્ઞાત્વા કવચં દેવિ ગણેશસ્ય મનું જપેત્ ।
સિદ્ધિર્નજાયતે તસ્ય કલ્પકોટિશતૈરપિ ॥ ૨॥

ૐ આમોદશ્ચ શિરઃ પાતુ પ્રમોદશ્ચ શિખોપરિ ।
સમ્મોદો ભ્રૂયુગે પાતુ ભ્રૂમધ્યે ચ ગણાધિપઃ ॥ ૩॥

ગણાક્રીડો નેત્રયુગ્મં નાસાયાં ગણનાયકઃ ।
ગણક્રીડાન્વિતઃ પાતુ વદને સર્વસિદ્ધયે ॥ ૪॥

જિહ્વાયાં સુમુખઃ પાતુ ગ્રીવાયાં દુર્મુખઃ સદા ।
વિઘ્નેશો હૃદયે પાતુ વિઘ્નનાથશ્ચ વક્ષસિ ॥ ૫॥

ગણાનાં નાયકઃ પાતુ બાહુયુગ્મં સદા મમ ।
વિઘ્નકર્તા ચ હ્યુદરે વિઘ્નહર્તા ચ લિઙ્ગકે ॥ ૬॥

ગજવક્ત્રઃ કટીદેશે એકદન્તો નિતમ્બકે ।
લમ્બોદરઃ સદા પાતુ ગુહ્યદેશે મમારુણઃ ॥ ૭॥

વ્યાલયજ્ઞોપવીતી માં પાતુ પાદયુગે સદા ।
જાપકઃ સર્વદા પાતુ જાનુજઙ્ઘે ગણાધિપઃ ॥ ૮॥

હારિદ્રઃ સર્વદા પાતુ સર્વાઙ્ગે ગણનાયકઃ ।
ય ઇદં પ્રપઠેન્નિત્યં ગણેશસ્ય મહેશ્વરિ ॥ ૯॥

કવચં સર્વસિદ્ધાખ્યં સર્વવિઘ્નવિનાશનમ્ ।
સર્વસિદ્ધિકરં સાક્ષાત્સર્વપાપવિમોચનમ્ ॥ ૧૦॥

સર્વસમ્પત્પ્રદં સાક્ષાત્સર્વદુઃખવિમોક્ષણમ્ ।
સર્વાપત્તિપ્રશમનં સર્વશત્રુક્ષયઙ્કરમ્ ॥ ૧૧॥

ગ્રહપીડા જ્વરા રોગા યે ચાન્યે ગુહ્યકાદયઃ ।
પઠનાદ્ધારણાદેવ નાશમાયન્તિ તત્ક્ષણાત્ ॥ ૧૨॥

ધનધાન્યકરં દેવિ કવચં સુરપૂજિતમ્ ।
સમં નાસ્તિ મહેશાનિ ત્રૈલોક્યે કવચસ્ય ચ ॥ ૧૩॥

હારિદ્રસ્ય મહાદેવિ વિઘ્નરાજસ્ય ભૂતલે ।
કિમન્યૈરસદાલાપૈર્યત્રાયુર્વ્યયતામિયાત્ ॥ ૧૪॥

॥ ઇતિ વિશ્વસારતન્ત્રે હરિદ્રાગણેશકવચં સમ્પૂર્ણમ્ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*haridrAgaNeshakavacham*

pdf was typeset on September 14, 2020

Please send corrections to *sanskrit@cheerful.com*